शुक्लवस्त्रधरं देवं प्रमाणाद्वामनं सदा ।
ईषद्धाससमायुक्तं त्रिलोकेशं त्रिविक्रमम् ।
चिन्तयेद्वरदं देवं सर्व्वकामफलप्रदम् ॥"
इति कालिकापुराणे ८२ अध्यायः ॥*॥
तस्योत्पत्तिर्यथा,—
"ततस्तु दशमे मासि विधौ ब्रह्मर्क्षसङ्गते ।
अष्टम्यामर्द्धरात्रौ च तस्यां जातो जनार्द्दनः ॥
इन्दीवरदलश्यामः पद्मपत्रायतेक्षणः ।
चतुर्भुजः सुन्दराङ्गो दिव्याभरणभूषितः ॥
श्रीवत्सकौस्तुभोरस्को वनमालाविभूषितः ।
वसुदेवस्य जातोऽसौ वासुदेवः सनातनः ॥
इति पाद्मोत्तरखण्डे ६० अध्यायः ॥*॥
तस्य चतुर्द्धा मूर्त्तिर्यथा,—
"एकांशेन जगत् कृत्स्नं व्याप्य नारायणः स्थितः ।
चतुर्द्धावस्थितो व्यापी सगुणो निर्गुणोऽपि वा ॥
एका भगवतो मूर्त्तिर्ज्ञानरूपा शिवामला ।
वासुदेवाभिधाना सा गुणातीता सुनिष्कला ॥
द्वितीया कालसंज्ञान्या तामसी शेषसंज्ञिता ।
निहन्ति सकलांश्चान्ते वैष्णवी परमा तनुः ॥
सत्त्वोद्रिक्ता तृतीयान्या प्रद्युम्नेति च संज्ञिता ।
जगत् स्थापयते सर्व्वं सा विष्णुप्रकृतिर्ध्रुवा ॥
चतुर्थी वासुदेवस्य मूर्त्तिर्ब्राह्मी सुसंज्ञिता ।
राजसी चानिरुद्धाख्या प्राद्युम्नी सृष्टि-
कारिका ॥
यः स्वपित्यखिलं हत्वा प्रद्युम्नेन सह प्रभुः ।
नारायणाख्यो ब्रह्मासौ प्रजासर्गंकरो हि सः ॥
या सा नारायणतनुः प्रद्युम्नाख्या मुनीश्वराः ।
तया संमोहयेद्विश्वं सदेवासुरमानुषम् ॥
सैव सर्व्वजगत्सूतिः प्रकृतिः परिकीर्त्तिता ।
वासुदेवो ह्यनन्तात्मा केवलो निर्गुणो हरिः ॥
प्रधानं पुरुषः कालस्तत्त्वत्रयमनुत्तमम् ।
वासुदेवात्मकं नित्यमेतत् विज्ञानतुच्यते ॥
एकवेदं चतुष्पादं चतुर्द्धा पुनरच्युतः ।
बिभेद वासुदेवोऽसौ प्रद्युम्नो हरिरव्ययः ॥"
इति कूर्म्मपुराणे ४८ अध्यायः ॥

वासुदेवप्रियङ्करी, स्त्री, (वासुदेवस्य प्रियङ्करी ।) शतावरी । इति राजनिर्घण्टः ॥ श्रीकृष्णप्रियकारिणी च ॥

वासुपूज्यः, पुं, (वासुर्नारायण इव पूज्यः ।) जिनविशेषः । इति हेमचन्द्रः । १ । २७ ॥

वासुभद्रः, पुं, श्रीकृष्णः । इति शब्दमाला ॥ (यथा, विष्णुपादादि-केशान्तवर्णनस्तोत्रे । ३१ ।
"या वायावानुकूल्यात् सरति मणिरुचा भासमानासमाना
साकं साकम्पमंसे वसति विदधती वासुभद्रं सुभद्रम् ॥")

वासुरा, स्त्री, स्त्रीमात्रम् । करिणी । रात्रिः । भूमिः । इति हेमचन्द्रः ॥

वासूः, स्त्री, (वास्यते स्नेह्यते इति । वास + बाहुलकात् ऊः ।) नाट्योक्तौ बाला । इत्यमरः ॥

वासौकः, [स्] क्ली, (वासाय ओकः स्थानम् ।) वासगृहम् । यथा,—
"गर्भागारेऽपवरको वासौकः शयनास्पदम् ।"
इति हेमचन्द्रः ॥

वास्तवं, क्ली, (वस्त्वेव । वस्तु + अण् ।) यथार्थभूतम् । यथा,—
"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।"
इत्यादि श्रीभागवते प्रथमस्कन्धे १ अध्यायः ॥
"वास्तवं परमार्थभूतं वस्तु । यद्वा, वास्तवशब्देन वस्तुनोऽंशो जीवः वस्तुनः कार्य्यं जगच्च तत् सर्व्वं वस्त्वेव न ततः पृथक् ।" इति तट्टीकायां श्रीधरस्वामी ॥

वास्तविकं, त्रि, (वस्त्वेव वस्तु + ठक् ।) परमार्थभूतं वस्तु । वास्तवमेव इत्यर्थे वास्तवशब्दात् ष्णिकप्रत्ययेनापि निष्पन्नम् ॥

वास्तवोषा, स्त्री, रात्रिः । इति त्रिकाण्डशेषः ॥ किन्तु वास्तवा ऊषा इति नामद्वयमिति साधुपाठः ॥

वास्तव्यः, त्रि, वसतीति वस + "वसेस्तव्यत् कर्त्तरि णिच्च ।" ३ । १ । ९६ । इत्यस्य वार्त्तिकोक्त्या वासकर्त्ता । कर्त्तरि तव्यत् । इति सिद्धान्तकौमुदी ॥ (यथा, कथासरित्सागरे । ३८ । १०७ ।
"इहैवास्मि महीराज वास्तव्यो नगरे द्विजः ॥")
वासयोग्यश्च । वसतौ, पुं ॥

वास्तु, क्ली, वास्तूकशाकम् । इति राजनिर्घण्टः ॥

वास्तु, क्ली पुं, (वसन्ति प्राणिनो यत्र । वस निवासे + "वसेरगारे णिच्च ।" उणा० १ । ७० । इति तुण् । स च णित् ।) गृहकरणयोग्यभूमिः । तत्पर्य्यायः । वेश्मभूः २ । इत्यमरः ॥ पोतः ३ वाटी ४ । इति जटाधरः ॥ वाटिका ५ गृहपोतकः ६ । इति शब्दरत्नावली ॥ वास्तुकरणप्रमाणादिर्यथा,—
श्रीहरिरुवाच ।
"वास्तु संक्षेपतो वक्ष्ये गृहादौ विघ्ननाशनम् ।
ईशानकोणादारभ्य ह्येकाशीतिपदे यजेत् ॥
ईशाने च शिरःपादौ नैरृतेऽग्यानिले करौ ।
आवासवासवेश्मादौ पुरे ग्रामे वणिक्पथे ॥
प्रासादारामदुर्गेषु देवालयमठेषु च ।
द्वात्रिंशत्तु सुरान् बाह्ये तदन्तश्च त्रयोदश ॥
ईशश्चैवाथ पर्ज्जन्यो जयन्तः कुलिशायुधः ।
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च ॥
पूषा च वितथश्चैव गृहक्षेत्रयमावुभौ ।
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो गणाधिपः ।
असुरः शेषपापौ च रोगोऽहिर्मुख्य एव च ॥
भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते तु तदन्तश्चतुरः शृणु ॥
ईशानादिचतुष्कोणसंस्थितान् पूजयेद्बुधः ।
आपश्चैवाथ सावित्री जयो रुद्रस्तथैव च ॥
मध्ये नवपदो ब्रह्मा तस्याष्टौ च समीपगान् ।
देवानेकोत्तरानेतान् पूर्व्वादौ नामतः शृणु ॥
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ॥
अष्टमश्चापवत्सश्च परितो ब्रह्मणः स्मृताः ।
ईशानकोणादारभ्य दुर्ज्जयो वंश उच्यते ॥
आग्नेयकोणादारभ्य वंशो भवति दुर्द्धरः ।
अदितिं हिमवन्तञ्च जयन्तञ्च इदं त्रयम् ॥
नायिका कारिका नाम शक्राद्यन्यर्व्वगा पुनः ।
वास्तुदेवान् पूजयित्वा गृहप्रासादकृद्भवेत् ॥
सुरेभ्यः पुरतः कार्य्यं दिश्याग्नेय्यां महानसम् ।
रूपनिर्गमणे येन पूर्व्वतः सत्रमण्डपम् ॥
गन्धपुष्पगृहं कार्य्यमैशान्यां पट्टसंयुतम् ।
भाण्डागारञ्च कौवेर्य्यां गोष्ठागारञ्च वायवे ॥
उदगाश्रयश्च वारुण्यां वातायनसमन्वितम् ।
समित्कुशेन्धनस्थानमायुधानाञ्च नैरृते ॥
अभ्यागतालयं रम्यं शय्यासनसपादुकाम् ।
तोयाग्निदीपसद्भृत्यैर्युक्तं दक्षिणतो भवेत् ॥
गृहान्तराणि सर्व्वाणि सजलैः कदलीगृहैः ।
पञ्चवर्णैश्च कुसुमैः शोभितानि प्रकल्पयेत् ॥
प्राकारं तद्बहिर्द्द्यात् पञ्चहस्तं प्रमाणतः ।
एवं विष्ण्वाश्रमं कुर्य्याद्वनैश्चोपवनैर्युतम् ॥
चतुःषष्टिपदो वास्तुः प्रासादादौ सुपूजितः ।
मध्ये चतुष्पदो ब्रह्मा द्विपदास्त्वर्य्यमादयः ॥
कर्णे चैवाथ पञ्चाद्यास्तथा देवाः प्रकीर्त्तिताः ।
तेभ्योऽप्युभयतः सार्द्धा अन्येऽपि द्विपदाः सुराः ॥
चतुःषष्टिपदे देवा इत्येवं परिकीर्त्तिताः ।
चरकी च विदारी च पूतना पापराक्षसी ॥
ईशानाद्यास्तथा बाह्ये देवाद्या हेतुकादयः ।
हेतुकस्त्रिपुरान्तश्च अग्निर्वेतालको यमः ॥
अग्निजिह्वः कालकस्तु करालो ह्येकपादकः ।
ईशान्यां भीमरूपस्तु पाताले प्रेतनायकः ॥
आकाशे गन्धमाली स्यात् क्षेत्रपालस्तथा
यजेत् ।
विस्ताराभिहतं दैर्घ्यं राशिद्वारन्तु कारयेत् ॥
वसुभिर्भागशुद्धिञ्च शेषाङ्कादायमादिशेत् ।
पुनर्गुणितमष्टाभिर्ऋक्षभागन्तु भाजयेत् ॥
यच्छेषं तद्भवेद्धिष्ण्यं भागे हृत्य व्ययं भवेत् ।
ऋक्षं चतुर्गुणं कृत्वा नवभिर्भागहारितम् ॥
शेषमंशं विजानीयात् देवलस्य मतं यथा ।
अष्टाभिर्गुणितं पिण्डं षष्टिभिर्भागहारितम् ॥
यच्छेषन्तु भवेज्जीवं मरणं भूतहारितम् ।
वास्तुक्रोडे गृहं कुर्य्यात् न पृष्ठे मानवः सदा ॥
वामपार्श्वेन स्वपिति नात्र कार्य्या विचारणा ।
सिंहकन्यातुलायाञ्च द्वारं शुद्धेरथोत्तरम् ॥
एवञ्च वृश्चिकादौ स्यात् पूर्व्वदक्षिणपश्चिमम् ।
द्वारं दैर्घ्यार्द्धविस्तारं द्वाराण्यष्टौ स्मृतानि च ॥
सुतालम्पेष्यनीचत्वं सुयानं छत्रभूषणम् ।
पुत्त्रहीनन्तु रौद्रेण वीर्य्यघ्नं दक्षिणे तथा ॥
वह्नोऽवन्धवायुर्वृद्धिः पुत्त्रलाभस्तथाशिवे ।
धनदं नृपपीड़ादमर्थघ्नं रोगदं जले ॥
नृपभीतिर्म्मृतापत्या अनपत्यञ्च वैरिदम् ।
अर्थदं वार्थहान्येव दोषदं पुत्त्रसौख्यदम् ।
द्वाराण्युत्तरसंज्ञानि पूर्व्वद्वाराणि वच्म्यहम् ।